श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३३

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ३३

*अम्बरीषोपाख्यानम्*

वैवस्वताख्यमनुपुत्रनभागजात-
नाभागनामकनरेन्द्रसुतोऽम्बरीषः।
सप्तार्णवावृतमहीदयितोऽपि रेमे
त्वत्सङ्गिषु त्वयि च मग्नमनास्सदैव॥ १ ॥

त्वत्प्रीतये सकलमेव वितन्वतोऽस्य
भक्त्यैव देव नचिरादभृथाः प्रसादम्।
येनास्य याचनमृतेऽप्यभिरक्षणार्थं
चक्रं भवान् प्रवितितार सहस्रधारम्॥ २ ॥

स द्वादशीव्रतमथो भवदर्चनार्थं
वर्षं दधौ मधुवने यमुनोपकण्ठे।
पत्न्या समं सुमनसा महतीं वितन्वन्
पूजां द्विजेषु विसृजन् पशुषष्टिकोटिम्॥ ३ ॥

तत्राथ पारणदिने भवदर्चनान्ते
दुर्वाससाऽस्य मुनिना भवनं प्रपेदे।
भोक्तुं वृतश्च स नृपेण परार्तिशीलो
मन्दं जगाम यमुनां नियमान्विधास्यन्॥ ४ ॥

राज्ञाऽथ पारणमुहूर्तसमाप्तिखेदा-
द्वारैव पारणमकारि भवत्परेण।
प्राप्तो मुनिस्तदथ दिव्यदृशा विजानन्
क्षिप्यन् क्रुधोद्धृतजटो विततान कृत्याम्॥ ५ ॥

www.prapatti.com

कृत्यां च तामसिधरां भुवनं दहन्ती-
    मग्रेऽभिवीक्ष्य नृपतिर्न पदाच्चकम्पे।
त्वद्भक्तबाधमभिवीक्ष्य सुदर्शनं ते
    कृत्यानलं शलभयन् मुनिमन्वधावीत्॥ ६ ॥

धावन्नशेषभुवनेषु भिया स पश्यन्
    विश्वत्र चक्रमपि ते गतवान् विरिञ्चम्।
कः कालचक्रमतिलङ्घयतीत्यपास्तः
    शर्वं ययौ स च भवन्तमवन्दतैव॥ ७ ॥

भूयो भवन्निलयमेत्य मुनिं नमन्तं
    प्रोचे भवानहमृषे ननु भक्तदासः।
ज्ञानं तपश्च विनयान्वितमेव मान्यं
    याह्यम्बरीषपदमेव भजेति भूमन्॥ ८ ॥

तावत्समेत्य मुनिना स गृहीतपादो
    राजाऽपसृत्य भवदस्त्रमसावनौषीत्।
चक्रे गते मुनिरदादखिलाशिषोऽस्मै
    त्वद्भक्तिमागसि कृतेऽपि कृपां च शंसन्॥ ९ ॥

राजा प्रतीक्ष्य मुनिमेकसमामनाश्वान्
    सम्भोज्य साधु तमृषिं विसृजन् प्रसन्नम्।
भुक्त्वा स्वयं त्वयि ततोऽपि दृढं रतोऽभू-
    त्सायुज्यमाप च स मां पवनेश पायाः॥ १० ॥

**********



www.prapatti.com